भावे पौत्रस्य तस्याप्यभावे प्रपौत्रस्य च दायभाक्त्वमिति दर्शयितुं । तत्प्रसंगे स्पष्टीकरिष्य
ते । पुत्रपौत्रप्रपौत्राभावे दौहित्रस्य तत्कृतोपकारितामाह ॥ पौत्रदौहित्रयोर्लोके विशेषो नोप
पद्यते । दौहित्रोपि ह्यमुत्रैनं संतारयति पौत्रवत् ॥ ८ ॥ पौत्रदौहित्रयोरिहलोके विशेषसत्वेपि
परलोके विशेषो नास्ति तुल्योपकारजनकत्वात् । तमेव दर्शयति । यतः पौत्रवदेव दौहित्रोपि
पुत्रं मातामहं संतारयति ॥ नरकादुद्धरत्येव । अत्र च दायभागप्रकरणे सपिंडप्रस्तावेऽ
भिधानं पुत्रपौत्राद्यभावे दौहित्रस्य धनसंबंधं पिंडसंबंधं च प्रतिपादयितुं । तथा च स्मृ
त्यंतरे ॥ अपुत्रपौत्रसंताने दौहित्रो धनमाप्नुयात् ॥ पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मता
इति ॥ इदं च पुत्रिकापुत्रत्वेनापुत्रत्वव्यपदेशाविरोधाद्बोध्यं तस्मात्पुत्रीकृताकृतदुहितृसुतस्या
पि मातामहधनसंबंधोस्तीत्यनेन बोधितं । अत एव मनुः । अकृता वा कृता वापि यं विंदेत्स

दृश्यात्सुतं॥पौत्री मातामहस्तेन दद्यात्पिंडं हरेद्धनमिति मनुः अपद्दुहितृसुतस्य मातामहधन
संबंधं दर्शयति॥ सच पुत्रीकृत क्षेत्रभाव इत्येव क्षपते। इति श्रीमन्महाराजाधिराज श्रीव
सिष्ठवंशावतंस श्रीअच्युतनाथकात्मज श्रीतम्मसानापकापरनामधेय श्रीकेशवनाप
कप्रोत्साहित श्रीवाराणसीवासि धर्माधिकारि श्रीरामपंडितात्मज श्रीनंदपंडित कृ
तौ विष्णुस्मृतिविवृतौ श्रीमत्पां वैजयंत्यां पंचदशोऽध्यायः १५॥ एवं मुख्यगौणसुता
न्विभज्य गौणानां निरूपिताः सांप्रतं कोऽसौ आपे मुख्यसुतास्तदंतरभेदं च लक्षयति।
समानवर्णासु पुत्राः सवर्णा भवंति॥ भर्तृवेश्मपा समानवर्णासु इत्युपलक्षितं तेन
प्रशस्तविवाहोढासु अक्षततपोनिष्ठमनार्षगोत्रासु असपिंडासु परीपसासु धातमतीषु
चैत्यपि द्रष्टव्यं। तासु भर्त्रा जनिताः पुत्रा मातापितृसमानवर्णा भवन्ति॥ यत्राह बौधायनः।

स्त्रानार्यस्य द्विजाहृत्मायुरैस्सै ; संस्कृतामुत्पन्ना स्तज्जातौ पर्भवंति जात्य इति ॥ एतान्
ब्राह्मणादेन च्युरः आर्यस्य शूद्रीकस्य । आर्ये गृहस्ता शूद्रस्य त्वि जाहृतस्ते ठायामपि
जातस्य सवर्णत्वं भवति ॥ नत्वनु ठाया । मनुरप्या सर्वे वर्णेषु तुल्यासु पत्नीष्व क्षतयोनि
षु । आनुलोम्येन संभूता जात्या ज्ञेयास्त एव ते ॥ आनुलोम्यं च वीयस्व कन्यापाः न तु वर्णता
लोम्यं तस्य जात्यंतरापादकत्वात् । तेन वरस्यापयस्यामुत्पन्नस्य न वर्णता नेति । सगोत्राद्दिष्ठ
तु चंडालत्वमेव संपद्यते । आहु कपिलितापत्यं ब्राह्मण्यां पञ्च भूदूजः । सगोत्रोढासुतश्चैव
चंडालास्त्रय ईरिता इति ॥ आतमतीत्वं भ्राता जो लोना पश्च पतीति राज्ञा वाये भ्रातुः कृतत्वेन
तदभावे होमप्रयुक्तत्वेन संस्कारमुत्पन्नेरावश्यकं ॥ न च भ्रातृस्थानीयेन तत्साहुरूपं । तस्मा
पांभावे वैगुण्यापत्तादवश्यान्त ॥ एतेन कामेन सहोढ पेन भवजूजोस्य न्नकुंड गोलका

नामसवर्णत्वमुक्तं भवति॥ ब्राह्मणत्वादिजातेः शास्त्रैकसमधिगम्यत्वात्। अन्यथा
२ जातिविवेकशास्त्रानर्थक्यापातात्॥ न चाभिव्यंजकं निरूपणापतते॥ तावतापि लौकिक
त्वसिद्धेः पूर्वाह्णवतीयत्वादिवत्॥ न चैजन्यजनकाभावस्त्वाभिव्यंजकः सद्यमानप्रत्यक्ष
एवेति वाच्यं तावन्मात्रस्यातिप्रसक्तत्वेन जनककोट्यांपि ब्राह्मण्यादिविशेषणमुपयोग
मात्॥ तथा जनमातुरप्यप्रत्य। स्मरणानापि शाब्देन प्रत्यक्षाधीनत्वात्तस्येति तस्यापि
त्रैत्वहेत्वासिद्धेः॥ एवं च स्त्रियाः स्वतंत्रतः पुरुषजातीयादिनप्रत्यक्षात्तदपत्यस्य
पुत्रजातिः प्रत्यक्षा स्यात्॥ तस्मात्तत्त्वब्राह्मण्यमलौकिकं लौकिकार्थक्रियासाधनत्वाभावा
द्रव्यनीपादेवदृश्यत्वमानादेवालौकिकं तन्न॥ पचनगमनभोजनादेः कार्यत्वं ब्राह्मणा
स्याप्यस्ति तथापि न ब्राह्मणपुरस्कारेण किंतु प्राणित्वादिनैव तद्रूपेण त्वालौकिका

क्षियायामेव साधुमत्वा यत्रापि ब्राह्मणस्य क्षतं कृष्णा इत्यादि दुःखरात्तादेश्यादे ब्राह्म
रामे वंडे प्रयोजकं । तत्राप्यपर्थपरेन तान्निवन्ते । एवमवदनिच्छान्तेवं श्रीछस्वार्थस्त्वा
तानवदंडनमर्थवती क्रियादौ बभ्रवरागात् । अनिच्छन्ति रिक्तानुसर्वपोषु । क्रियासामान्य
विधिनार्थवमेवते । तेन कोप्यसिद्धिः । अत एवाव सिषः । प्रकृति विशिष्टं चातुर्वर्ण्यं
संस्कार विशेषा वितुर्ता ब्राह्मणोस्यमुखमासीदित्यपि निगमो भवतीत्याह । एवं वर्ष्ठव
यत्वा धुन्ने पंमित्यलमप्रपंचेन । विशेषस्तु मिताक्षराटीकायां प्रमिताक्षरायांमस्मत्कृत
यामवगंतव्यः । सवर्णापदव्याख्यामाह । अनुलोमास्तु मातृसवर्णाः । ब्राह्मणादीना
मानुलोमाः क्षत्रियादयस्ताभ्यस्तेभ्यो जाताः मातृसवर्णाः पुत्रा भवंति । मातृसवर्णत्वं तत्त
द्वर्णधर्मप्राप्त्यै ॥ ब्राह्मणेन क्षत्रियायामुत्पादितः क्षत्रिय एव क्षत्रियेण वैश्यायां

वैश्यस्य वैश्यायां स्त्र शूद्रायां शूद्रस्य वेति संख्यसमरणात्॥ नन्वत्र ८ तदर्शप्रास्येजा
त्यंतरस्मरणात। यथाह योगीश्वरः। विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः
स्त्रियां॥ अंबष्ठः शूद्र्यां निषादो जातः पाराशवोपि वा॥ वैश्याशूद्र्योस्तु राजन्यान्मा
हिष्योग्रौ सुतौ स्मृतौ॥ वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृत इति। गौतमस्त
थाह। अनुलोमानंतरैकांतरद्व्यंतरप्रजाताः सवर्णांबष्ठोग्रनिषाददौष्यंतपारस
वाः इति। अस्यार्थः। ब्राह्मणस्यानंतरा क्षत्रिया तस्यां तस्मात्सवर्णः क्षत्रियस्य वैश्या
तस्यां तस्मादंबष्ठो द्व्यंतः। ब्राह्मणस्य द्व्यंतरा शूद्रा तस्यां तस्मात्पारसव इति। एता
भ्यां योगीगौतमभ्यां ब्राह्मणादिभ्यः क्षत्रियाद्युजातानां संज्ञाविशे २
षोभिहितः। स यथा मूर्द्धावसिक्तः सवर्णो। अंबष्ठ निषाद उग्र करण निषादपा १८

रसंवैरमाहिष्याम्बष्ठौ। उग्रदौष्यन्तपवनाः करणेगौ वेति॥ अस्मादेवच्च वेत्थ्यान्मू
र्धसंसानामिधानमितिनत्पनत्वं॥ अनुलोमानामपि पितृसवर्णत्वं। क्वचिदाह योगी
श्वरः। जात्युत्कर्षो युगे ज्ञेयः सप्तमे पंचमेपि वा। व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तर
म्॥ इति। जातयो मूर्धावसिक्ताद्यास्तासामुत्कर्षो ब्राह्मणत्वादिवर्णप्राप्तिः सा
सप्तमेऽपि भवति षष्ठे पंचमे वा युगे द्रष्टव्या पुंसपोर्भवति। यथा ब्राह्मणेन शूद्राया
मुत्पादिता निषादी सा ब्राह्मणेना[illegible] कन्यां जनयति सापि ब्राह्मणेना[illegible] कन्यामित
रमित्येवं सप्तमी षष्ठमं ब्राह्मणं जनयति। एवमम्बष्ठोऽम्बष्ठः सप्तममेवं मूर्धा
वसिक्ता पंचमी षष्ठमेवमन्यत्र ज्ञेयं। तथा शूद्रेण न्यायाजीवन ब्राह्मणोपं जनयति
सोऽपि तथान्यायाजीवन्नू इत्येवं सप्तमे षष्ठे जातौ सप्तमाः। शूद्र एव भवति॥

एवं वैश्यवत्स्या षष्ठे द्वंद्वे सप्तमो वैश्यः एवं क्षत्रियवत्स्या पंचमे द्वंद्वे षष्ठः क्षत्रि
य इति। तथा शूद्रावसिक्तः क्षत्रियायां पुत्रं जनयति सोपि क्षत्रियायां पुत्रांतरमित्ये
वं पंचमे द्वंद्वे षष्ठः क्षत्रिय एव। एवं मध्यमेन वैश्याशूद्राषष्ठे द्वंद्वे सप्तमं वैश्यं। एवं
निषाद्याशूद्रामुद्वासप्तमे द्वंद्वे षष्ठमं शूद्रमेवं त्वपि ज्ञेयं॥ वर्णांतरमननमुत्कर्षापक
र्षाभ्यां सप्तमेन पंचमेन वा षष्ठेनापि इति गौतमस्मरणात्। तस्यैव भाव वर्ण्यांतरमाह। प्रति
लोमास्तु धर्मविगर्हिताः॥ शूद्रादीनां प्रतिलोमा वैश्याद्युपस्त्रासु तेभ्यो जाता आर्यवि
गर्हिताः स्त्रैवार्णिकधर्मात्याः शूद्रसधर्माणा इत्यर्थः। अनेनानुलोमजानां द्विजधर्मत्व ४
मुक्तं। यथाह मनुः। सजातिजानंतरजाः षट्सुता द्विजधर्मिणः। जातानां नाहीनन्पर्वे शूद्रधर्मत्वमुक्तमेव।
गौतमस्तु शूद्रायामनुलोमजस्याप्यधर्मत्वमाह। प्रतिलोमास्तु षट्सुता द्विजधर्मिणः।
१६५

शूद्रासां तु सधर्माणः सर्वेपध्वंसजास्त्वता इति। अपध्वंसो व्यभिचारः॥
तेन कानीनादेः कन्यापतिमपि शूद्रधर्मत्वमेव। जोतमस्तु शूद्रायामनुलोमजे स्या
च धर्मत्वमाह। प्रतिलोमास्तु धर्महीना शूद्रायां चेति। प्रतिलोमजे च्वपि विशेषं स
एवाह। असमानत्वेन तु शूद्रोत्पत्तित्वक्तिरिति। असमाना वैश्यादिस्तस्याः। शूद्रो
त्पन्नः। आयोगवादिः पतितश्च भवति। एतेन वैश्यापुत्रस्य न तस्य प्रतिलोमजस्यानपति
तत्वक्तिरपि तु शूद्रसधर्मत्वमेति। तामेव संसापूर्वकं लक्षयति। तत्र वैश्यापुत्रः शूद्रे
णायोगवः। ५। तत्र षट्स्वां प्रतिलोमजानां मध्ये शूद्रेण वैश्यायामुत्पन्नः पुत्र आ
योगवसंज्ञो भवति। पुल्कसमागधौ क्षत्रियापुत्रौ वैश्य शूद्राभ्यां च। क्षत्रियायां
वैश्यादुत्पन्नः पुल्कसः। मागध इति वा पाठो वर इति वा शूद्रादुत्पन्न अंत्रुडालो

वैश्यादुत्पन्नो वैदेहकः मागधो वैदेह इति यावुल्कस इति। क्षत्तेति वा। चंडा
ल वैदेहकः सूता ब्राह्मणीपुत्राः शूद्रविट्क्षत्रियाः ५ ब्राह्मण्यां शूद्रादुत्पन्नश्चंडा
५ लो वैश्यादुत्पन्नो वैदेहकः। क्षत्तेति वा। मागध इति। अस्यार्थः अनंतरैकांतरद्व्यंत
रासु जातोऽयमनुवर्त्तते तेन क्षत्रियस्यानंतरा ब्राह्मणी तास्तस्यां। तस्यां तु क्षत्ता। शूद्र
स्य क्षत्रिया तस्यां तस्माद्वैदेहकः। शूद्रस्य द्व्यंतरा ब्राह्मणी तस्यां तस्मा चंडाल इति। न
नंतरैतासु एव सवर्णानुलोमप्रतिलोमजाता संस्तानर माह। ब्राह्मणाज्जातं तत्पुत्रान
र्तेभ्य आनुपूर्व्याद् ब्राह्मणः सूतमागधचंडालान्। तेभ्य एव क्षत्रियामूर्द्धाव
सिक्त क्षत्रियाधीवरपुल्कसान् तेभ्य एव वैश्याभ्रज्जकंटमोहिष्यवैश्यवैदेहकं। पार
सवयवनकरणाश्च शूद्रान् इत्यर्थ इति। आनुपूर्व्ये वर्णितक्रमानत्वात् लोमया योगाश्च
रोपि। ब्राह्मणा क्षत्रियात्सूतो वैश्याद्वैदेहिकस्तथा। शूद्राज्जातस्तु चंडालः १६

सर्वधर्मबहिष्कृताः॥क्षत्रियामागधंवैश्यात्शूद्रात्क्षत्तारमेवच।शूद्रादायोगवंवै
श्याजनयामासवैसुतम्॥इति।वर्णसंकरवत्संकीर्णासंकरा अथाभयेषास्तदन
भिधानेनेमित्रमाह।संकरसंकरश्चासंख्येयाः।१संकरश्चानुलोमजेषुप्रतिलोमजे
षुचवर्णेभ्यःपुनरनुलोम्येनप्रातिलोम्येनचजातास्तेसंकरसंकरास्तथासंकरा
णामनुलोमजानांप्रतिलोमानांचानुलोम्येनप्रातिलोम्येनचपरस्परंयेसंकरास्ते
ऽसंख्येयाः।अनंतत्वात्।यथाहमनुः।ब्राह्मणादुग्रकन्यायामावृतोनामजायते।
आभीरोंबष्ठकन्यायामायोगव्यांतुधिग्वणः।जातोनिषादाच्छूद्रायांनाम्नाभवतिपुल्क
सः।शूद्रसाबोनिषाद्यांतुसवैकुक्कुटकःस्मृतः।क्षत्तुर्जातस्तथोग्रायांश्वपाकइ
तिकीर्त्यते।वैदेहकेनत्वंबष्ठ्यामुत्पन्नोवेणउच्यतेइत्यादिमानवेएषांतुसंक्षेपं॥

तेषामप्यानुलोम्यप्रातिलोम्याभ्यामुत्पत्तावुत्कर्षापकर्षौ ज्ञेयौ॰ पूर्ववच्चाधरोत्तरम्
इतियोगिस्मरणात् । प्रतिलोमजानां वृत्तिमाह । रंगावतरणमायोगवानां । रंगावतर
णमन्त्रविद्यान्वया । शिक्षा च तयायोगवानां वृत्तिः स्व ष्टि स्त्वायोगवस्य चेति मनुः
त्वष्टिः कोष्ठादितक्षणं । यथाह मनुः । मेदान्ध्रचुञ्चुमद्गूनामारण्य । मा धतपशुस्वसा
ना । एतच्च तामारण्यपशुहिंसनं । पुल्कसानामिति तत्समानधर्मित्वात् तामन्येषाम
प्युपलक्षणं । यथाह मनुः । मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम् । क्षत्त्रुग्रपुल्कसानां
च बिलौकोवधबंधनमिति । निषादादिद्वेस्वाकारणाचरश्वमृकारविशेषः । आयोग
वश्चैव देहान्यो देनिषादाद्यागंधः । ब्राह्मणादेवदेहां जातः श्ववृदिस्त्रियां जातो मनुः ।
क्षत्रियेण शूद्रायां जातो वंदिरिति केचिदाय नो तं वेदद्धतंगो स्तुतिक्रियामागधानां १०(१६

स्तुतिक्रियासहसद्गुरुत कीर्त्तनं मागधानां वृत्तिः। मागधानां वणिक्पथमित्तिम
नुः॥ वणिक्पथो वाणिज्यं॥ वध्यं जातित्वं चंडालानां॥११ वध्यानां चोरा
दीनां घातनं चांडालानां वृत्तिः। वध्यवचनात् श्वपचानां चायं धाह मनुः। चंडा
लश्वपचानां वेत्युपक्रम्य अपात्रेष्वेवं शवे वनिर्हरेयुरिति स्मृतिः। वध्यांश्च
हन्युः सततं यथाशास्त्रं नृपाज्ञया वध्यवासांसि गृह्णीयुः शय्यांश्चाभरणानि
चेति। स्त्रीरक्षातनावनं च वैदेहकानां॥१२ स्त्रीरत्तां नर्तक्यादीनां रक्षापो
षणादिना जीवनं तदुपार्जित द्रव्यजीवनं च वैदेहकानां वृत्तिः। अंततः।

२६५ पुरक्षेतन्ये। अश्वसारथ्यं सूतानां ९२। अश्वानां दमनयोजनादि शालिहो
त्रसानं रथसारथ्यं च सूतानां वृत्तिः। चंडालेषु विशेषमाह। चंडालानां बहिर्ग्राम
निवसनं मृतचेलधारणमिति प्रतिलोमजानां मध्ये चंडालादीनां विशे
षः।। विशेषग्रहणात्तभिन्नभांडभोजनादयोऽन्ये धर्मा अप्यनुसा
पन्ने।। यथाह मनुः। चंडालश्वपचानां तु बहिर्ग्रामात्प्रतिश्रयः
कारावरो निषादात्तु चर्मकारः प्रजापते। वैदेहकांध्रमेदौ च बहिर्ग्रामप्र।।